नं. ४८०८

नाम- ग्रहयज्ञपद्धतिः

कर्त्ता- x

पत्र- २२ पत्राणि सं. x

विषयः- धर्मशास्त्रम्

✓

(ग्रहयज्ञपद्धतिः)

४८०८

३३० गुरोप नः सपत्नीकः साचार्य वृ त्तक्को यजमानो मंगलघोषसंयुक्तः
कलशहस्तो भद्रं कर्णेभिरिति मंत्र घोषेण मंडपं प्रदक्षिणीकृत्य पश्चिमद्वा
रेण प्रविशेत्॥ ततो मंडपांतः कुंडपश्चिमदेशे उपविश्याचम्य प्राणानायम्य॥
देशकालौ स्मृत्वा अत्र घैवंविधे देशकाले च ब्राह्मण द्वारा कृतस्य ग्रहजप
स्य दशांशेन अमुक द्रव्येण यथाशक्ति ब्राह्मण द्वारा होममहं करिष्ये॥ तदंग
तया निर्विघ्नार्थं गणेशपूजनमहं करिष्ये इति संकल्प्य षोडशोपचारैर्गणाधि
पं संपूज्य॥ ततो गौरसर्षपैः सर्वतो मंडपांतरं विकिरेत्॥ तत्र मंत्राः॥
यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा॥ स्थानं त्यक्त्वा तु तत्सर्वं यत्र
स्थं तत्र गच्छतु॥ अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशं॥ सर्वेषामविरो
धेन ब्रह्मकर्म समारभेत्॥ ततः पंचगव्येन कुशैः सर्वतः प्रोक्षणमापोहि

ग्र० दूतिकसचेन कार्यः। ततः कृतांजलिः स्वस्तिइंद्र इति मंत्रं पठेत्॥ ततो वेद्यां स
र्वतो भद्रमंडलं विलिख्य ततो यजमानो ग्न्यायतनाद्दक्षिणे तउपविशेत्॥ आ
चार्यस्तु कुंडे पश्चिमे उपविश्य प्राणानायम्य ग्रहहोमकर्मणि अग्निस्थाप
गर्भ४ नमहं करिष्ये॥ तदंगतया संभारानादि करिष्ये॥ इति संकल्प्य कुंडे स्थंडिले
वा पंच भू संस्कारान् कुर्यात्॥ तद्यथा॥ त्रिभिर्दर्भैः पश्चिमत आरभ्य प्रागंत
मुदक्संस्थं त्रिः परिसमूह्य तेरा न गोमयेनोपलिपेत्॥ पश्चात् स्रुवेण त्रिरु
ल्लिखेत्॥ ततोऽनामिकांगुष्ठाभ्यां प्रांच उद्धरेत्॥ एवमुत्तरोत्तरेखयोः ए
वं प्रतिरेखमभ्युक्षेत्॥ ततो लौकिकाग्निं कांस्यादिपात्रेण स्त्रवयेन वा आ ८
त्माभिमुखं कुंडे प्रणमेत्॥ ततश्चत्वारि शृंगे त्यावा मनो ज्योतिरिति प्र
तिष्ठाप्य॥ अथाग्निध्यानं॥ रुद्रतेजः समुद्भूतं द्विमूर्धानं द्विनासिकं॥

षणे त्रं चतुः श्रोत्रं त्रिपादं सप्तहस्तकं ॥ याम्यभागे चतुर्हस्तं सव्यभागे त्रिहस्तकं ॥
स्रुवं स्रुचं च शक्तिं च अक्षमाला च दक्षिणे ॥ तोमरं व्यजनं चैव घृतपात्रं तु वामकं ॥
बिभ्रंतं सप्तभिर्हस्तैर्द्विमुखं सप्तजिह्वकं ॥ दक्षिणे च वक्त्रे चतुर्जिह्वं त्रिजिह्वमुत्तरं मुखं ॥
द्वादशकोटि सूर्याभं द्विपंचाशत्कलायुतं ॥ स्वाहास्वधावषट्कारैरंकितं मेषवा
हनं ॥ रक्तमाल्यांबरधरं रक्तपद्मासनस्थितं ॥ रौद्रत्वं वह्निनामानं वह्निमावाह
याम्यहं ॥ त्वं मुखं सर्वदेवानां सप्तार्चिरमितद्युते ॥ आगच्छ भगवन्देव यज्ञेऽस्मिन्सं
निधौ भव ॥ एवं कुंडे स्थंडिले वाग्निप्रणयनं विधाय गृहवेद्यां स्थापनं कुर्यात् ॥
नानाये प्रयोगः ॥ प्रणवस्य ब्रह्मा ऋषिः परमात्मा देवता देवी गायत्री छंदः व्या ह्नि
हृतीनां क्रमेण जमदग्नि भरद्वाज भृगवो ऋषयः अग्निवायुसूर्या देवता देवी गा
यत्री देवी उष्णिक् देवी बृहती छंदांसि सर्वकर्मारंभे विनियोगः ॥ केचित्तंत्रान्मंत्रा

ग्र०

नप्पावाहने आहु ॥ ततत्र ग्रहपीठमध्ये वर्तुले द्वादशांगुले मंडले आभुरवं सूर्यं रक्त
पुष्पाक्षतैः ॥ आकृष्णेनेति हिरण्यस्तूप ऋषिः त्रिष्टुप् छंदः सविता देवता सूर्या
वाहने विनियोगः ॥ ॐ आकृष्णेन रजसा० पश्यन् ॥ ॐ भूर्भुवः स्वः कलिंगदेशोद्भ
व काश्यपगोत्र सूर्य इहागच्छ इहतिष्ठ इति स्थापयेत् ॥ ततः आग्नेये चतु
रस्रे चतुर्विंशत्यंगुले मंडले प्रत्य भुरवं सोमं श्वेतपुष्पाक्षतैः ॥ इमं देवा इत्यस्य वरु
ण ऋषिः यजुः सोमो देवता सोमावाहने विनियोगः ॥ ॐ इमं देवा० राजा ॥ ॐ
भूर्भुवः स्वः यमुनातीरोद्भव आत्रेयसगोत्र सोम इहागच्छ इहतिष्ठ इति स्था
पयेत् ॥ ततो दक्षिणे त्रिकोणे अंगुले मंडले दक्षिणामुरवं भौमं रक्तपुष्पाक्षतैः ॥ अ
ग्निर्मूर्द्धेति विरूपाक्ष ऋषिः गायत्री छंदः अंगारको देवता अंगारकावाहने विनि
योगः ॥ ॐ अग्निर्मूर्द्धा० जिन्वति ॥ ॐ भूर्भुवः स्वः अवंतीदेशोद्भव भारद्वाजसगोत्र

भौम इहागच्छ त्वा वा ह्य इह तिष्ठ तिस्थापयेत्॥ ततः ईशाने बाणाकारे चतुरंगुले मं
डले उदङ्मुखं बुधं पीतं पुष्पाक्षतैः। उद्बुध्यस्वेति परमेष्ठी ऋषिः त्रिष्टुप् छंदः बुधो देव
ता बुधावाहने विनियोगः॥ ॐ उद्बुध्यस्वाग्ने॰ सीदत॥ ॐ भूर्भुवः स्व मगधदेशोद्भव
आत्रेयसगोत्र बुध इहागच्छ त्वा वा ह्य इह तिष्ठ तिस्थापयेत्॥ ततः उत्तरे दीर्घे चतुरस्रे
षडंगुले उदङ्मुखं बृहस्पतिं पीतपुष्पाक्षतैः। बृहस्पते गृत्समद ऋषिः त्रिष्टुप् छंदः बृ
हस्पतिर्देवता बृहस्पत्यावाहने विनियोगः॥ ॐ बृहस्पते अति॰ चित्रं। ॐ भूर्भुवः स्वः
सिंधुदेशोद्भव आंगिरससगोत्र बृहस्पते इहागच्छ त्वा वा ह्य इह तिष्ठ तिस्थापयेत्॥ ततः ४ पूर्वे
पंचकोणे नवांगुले मंडले मंडले श्वेतं भृगुं शुक्लपुष्पाक्षतैः॥ अन्नात्परिस्रुतइ
ति प्रजापत्यश्विसरस्वती द्रा ऋषयः। जगती छंदः। भृगुर्देवता भृगुवाहने वि

नियोगः॥ॐ अन्नात्परिस्रुतो॰ मृतं मधु॥ ॐ भूर्भुवः स्वः भोजकट देशोद्भव भार्गवस
गोत्र शुक्र इहागच्छ त्वा वा इह तिष्ठ इति स्थापयेत्॥ ततः पश्चिमे धनुषि द्व्यंगुले मंडले श्वेत
अक्षुरं शनिं रक्तपुष्पाक्षतैः॥ शन्नो देवी इति दध्यङ्ङाथर्वण ऋषिः गायत्री छंदः शनैश्चर दे
वता शन्या वाहने विनियोगः॥ ॐ शन्नो देवीरभि॰ स्रवंतु नः॥ ॐ भूर्भुवः स्वः सौराष्ट्र देशो
स द्भव काश्यप गोत्र शनैश्चर इहागच्छ त्वा वा इह तिष्ठ इति स्थापयेत्॥ ततो नैरृत्ये श
र्पकारे द्वादशांगुले मंडले दक्षिणामुखं राहुं रक्तपुष्पाक्षतैः कया नश्चित्रा इति वामदेव ऋषिः
गायत्री छंदः राहुर्देवता॥ राहवा वाहने विनियोगः॥ ॐ कया नश्चित्र॰ वृता॥ ॐ भूर्भुवः
स्वः राठिनापुरोद्भव पैठीनसिस गोत्र राहो इहागच्छ त्वा वा इह तिष्ठ इति स्थापयेत्॥ ततो
वायव्यां ध्वजाकारे षडंगुले मंडले दक्षिणामुखं केतुं धूम्रपुष्पाक्षतैः केतुं कृण्वन्निति
मधुछंद ऋषिः गायत्री छंदः केतुर्देवता केत्वावाहने विनियोगः॥ ॐ केतुं कृण्व॰ थाः॥

ॐ भूर्भुवः स्वरंतर्वेदिसमुद्भव जैमिनिसगोत्र केतो इहागच्छ त्वावाहये इह तिष्ठेति
स्थापयेत्॥ केतूनां बहुत्वेपि पूजादावेकदेवतात्वमेकत्वपूजनादि। यथाक्रं कुसु
मतंडुला नाम भावेयथ्यालाभोपपन्नैः कुसुमतंडुलैः स्थापयेत्॥ सर्वेवा आदित्या
भिमुखाः स्थाप्या॥ इति मत्स्यपुराणे॥ ॥अथाधिदेवताः॥ ॥सर्वाः श्वेतपुष्पतंडु
लैः स्थापयेत्॥ त्र्यंबकमिति वशिष्ठ ऋषिः। अनुष्टुप् छंदः। रुद्रो देवता रुद्रस्थाप
ने विनियोगः॥ ॐ त्र्यंबकं० मृतात्॥ ॐ भूर्भुवः स्वः ईश्वर इहागच्छ त्वावाहये इह तिष्ठे
ति स्थापयेत्॥ सूर्यदक्षिणपार्श्वे ईश्वरं स्थापयेत्॥ ॥श्रीश्चतेति नारायण ऋषिः
त्रिष्टुप् छंदः उमा देवता उमास्थापने विनियोगः॥ ॐ श्रीश्चते लक्ष्मीश्च० मइषाण॥ ॐ
भूर्भुवः स्वः उमे इहागच्छ इह तिष्ठेति सोमदक्षिणपार्श्वे उमां०॥ यदक्रंदः प्रथमं जायमान
९ यदक्रंदेति भार्गवो जमदग्निर्दी[illegible] त्रिष्टुप् छंदः स्कंदो देवता स्कंदावाहने विनियोगः ९

१० ऽघत्त्समुद्रादुत॰वापुरीषान्नः॥ श्येनस्यपक्षाहिरिएस्यबाहूउपस्तुत्यंमहिजातंतेअर्व
न्॥ॐ भूर्भुवः स्वः स्कंदइहागच्छइहतिष्ठेति गोपदक्षिणपार्श्वे स्कंदः०॥ विष्णोररराटमित्य
छंदः स्यप्रजापति ऋषिः यजुः विष्णुर्देवताविष्णावाहनेविनियोगः॥ॐ विष्णोररराट०विष्णवे
त्वा॥ॐ भूर्भुवः स्वः विष्णोइहागच्छइहतिष्ठेति बुधदक्षिणपार्श्वे विष्णुं०॥ आब्रह्मन्नि
छंदः त्यस्यप्रजापति ऋषिः यजुः ब्रह्मादेवताब्रह्मस्थापनेविनियोगः॥ आब्रह्मन्ब्राह्मणो०क ल्प
ल्पतां॥ॐ भूर्भुवः स्वः ब्रह्मन्निहागच्छइहतिष्ठेति बृहस्पतेर्दक्षिणपार्श्वेब्रह्माणं०॥स
योबाइंद्रेति विश्वामित्र ऋषिः त्रिष्टुप्छंदः इंद्रोदेवताइंद्रस्थापनेविनियोगः॥ॐ स
जो जोषाइंद्र०विश्वतोनः॥ॐ भूर्भुवः स्वः इंद्रइहागच्छइहतिष्ठेति शुक्रस्यदक्षिणपार्श्वे इं ११
द्रं०॥ यमायत्वेतिदध्यङाथर्वण ऋषिः यजुः यमोदेवतायमस्थापनेविनियोगः॥ॐ

छंदः १

यमाय त्वांगिरः स्वतेपितृमते स्वाहा॥ स्वाहा घर्माय स्वाहा घर्मःपित्रे॥ ॐ भूर्भुवः स्वर्यम इहागच्छेह तिष्ठ तिशनैश्चर दक्षिणपार्श्वे यमं०॥ कार्षिरसीति प्रजापति ऋषिः अनुष्टुप् छंदः कालो देवता। कालस्थापने विनियोगः॥ ॐ कार्षिरसि। बीचीः॥ ॐ भूर्भुवः स्वः कालइहागच्छेह तिष्ठ तिष्ठ नि राहो ईदक्षिणपार्श्वे कालं०॥ चित्रावसोरिति ऋषय ऋषयः यजुर्जगती छंदः चित्रगुप्तो देवता चित्रगुप्तस्थापने विनियोगः॥ ॐ चित्रावसो० रीयस्य ॐ भूर्भुवः स्वश्चित्रगुप्त इहागच्छेह तिष्ठ तिकेतोर्ईदक्षिणपार्श्वे चित्रगुप्तं०॥ ततः शुक्ल पुष्प तंदुलैरेव सर्वाः प्रत्यधिदेवताः स्थापयेत्॥ ॐ अग्निंदूतमिति स्यविनूपाक्ष ऋषिः। गायत्री छंदः अग्निर्देवता अग्निस्थापने विनियोगः॥ ॐ अग्निं दूतं पुरोदधे हव्यवाहमुपब्रुवे॥ देवाँ॥ऽ आसादयादिह॥ ॐ भूर्भुवः स्वः अग्ने इहागच्छेह तिष्ठ ति सूर्य वामपार्श्वे अग्निं०॥ आपो हिष्ठेति सिंधुद्वीप ऋषिः गायत्री छंदः

आपोदेवता अपां स्थापने विनियोगः॥ ॐ आपो हिष्ठा० चक्षसे॥ ॐ भूर्भुवः स्वरापइह
गच्छत इह तिष्ठते ति सोम वाम पार्श्वे आपः०॥ स्योना पृथिवीति मेधातिथि ऋषिः
गायत्री छंदः पृथिवी देवता पृथिवी स्थापने विनियोगः॥ स्योना पृ० सप्रथा॥ ॐ भूर्भु
वः स्वः पृथिवी इहागच्छ इह तिष्ठेति भौम वाम पार्श्वे भूमिं॥ इदं विष्णुरिति मेधातिथि
ऋषिः गायत्री छंदः विष्णुर्देवता विष्णुस्थापने विनियोगः॥ ॐ इदं विष्णुर्विचक्रमे० सुरे॥
ॐ भूर्भुवः स्वर्विष्णो इहागच्छ इह तिष्ठेति बुध वाम पार्श्वे विष्णुं०॥ त्रातारमिंद्र स्य ग
र्ग ऋषिः त्रिष्टुप् छंदः इंद्रो देवता इंद्रस्थापने० ॐ त्रातारमिं० त्विंद्रः॥ ॐ भूर्भुवः स्व
रिंद्र इहागच्छ इह तिष्ठेति गुरु वाम पार्श्वे इंद्रं०॥ अदित्यै रास्नेति दध्यङ्गाथर्वण ऋषिः
यजुस्त्रिष्टुप् छंदः इंद्राणी देवता इंद्राणी स्थापने०॥ अदित्यै रास्नासींद्राण्या उष्णीषः पू
षासि घर्माय दीष्व॥ ॐ भूर्भुवः स्वरिंद्राणि इहागच्छ इह तिष्ठेति भृगु वाम पार्श्वे इंद्राणीं॥ प्र
जापते न त्वदिति हिरण्यगर्भ ऋषिः त्रिष्टुप् छंदः प्रजापतिर्देवता प्रजापति स्थापने०॥ ॐ 12

प्रजापते नत्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव ॥ यत्कामस्तेजुहुमस्तन्नोऽ
अस्तु वयं स्याम पतयो रयीणां ॥ ॐ भूर्भुवस्वः प्रजापते इहागच्छ इह तिष्ठ इति एतेन
वामपार्श्वे प्रजापतिं० ॥ नमोस्तु सर्पेभ्य इति मंत्रस्य प्रजापति ऋषिः अनुष्टुप् छंदः
सर्पा देवता सर्पस्थापने० ॐ नमोस्तु स० सर्पेभ्यो भ्यो नमः ॥ ॐ भूर्भुवः स्वः सर्पाः इहागच्छ
त इह तिष्ठ तिरा हो वामपार्श्वे सर्पान् स्थाप० ॥ ब्रह्मयज्ञानमित्यस्य प्रजापति ऋषिः
त्रिष्टुप् छंदः ब्रह्मा देवता ब्रह्मस्थापने० ॥ ॐ ब्रह्म जज्ञानं० विवः ॥ ॐ भूर्भुवः स्वः ब्र
ह्मन्निहागच्छ इह तिष्ठ ति केतो वामपार्श्वे ब्रह्माणं स्थाप० ॥ ॥ ततः भूतक पुष्पाक्षतै
र्विनायकादि पंच देवताः स्थापयेत ॥ गणानां त्वेत्यस्य प्रजापति ऋषिः यजुः ग
णपतिर्देवता गणपति स्थापने० ॥ ॐ गणानां त्वा० वसो मम ॥ ॐ भूर्भुवः स्वः गण
पति इहागच्छ इह तिष्ठ तिरा हो रूत्तरतो गणपतिं स्था० ॥ अंबे अंबिके इत्यस्य प्रजा

छंदः ३

१२०

पनिर्ऋषिः अनुष्टुप् छंदः दुर्गादेवता दुर्गास्थापने०॥ ॐ अंबे अं०० सिनी॥ ॐ भूर्भु
वः स्वः दुर्गे इहागच्छ इह तिष्ठ तिष्ठ रक्षरतो दुर्गां स्था०॥ आनो नियुद्भिरित्यस्य वसि
ष्ठ ऋषिः त्रिष्टुप् छंदः वायुर्देवता वायुस्थापने०॥ ॐ आनो नियुद्भिः शतिनीभिर
ध्वरं सहस्रिणीभिरुपयाहि यज्ञं। वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः
सदा नः॥ ॐ भूर्भुवः स्वः वायो इहागच्छ इह तिष्ठ तिष्ठ रक्षरतो वायुं स्था०॥ घृतं घृतपा
वान इति प्रजापतिर्ऋषिः चतुष्पंक्तिश्छंदः आकाशो देवता आकाशस्थापने०
ॐ घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा॥ ॐ भूर्भु
वः स्वः आकाश इहागच्छ इह तिष्ठ तिष्ठ रक्षरतो आकाशं स्था०॥ या वो कशेति मेधा
तिथि ऋषिः गायत्री छंदः अश्विनौ देवता अश्विनां स्था०॥ ॐ या वां कशा मधुम
त्यश्विना सूनृतावती तया यज्ञं मिमिक्षतं॥ ॐ भूर्भुवः स्वः अश्विना विह गच्छ तं इह १२

तिष्ठन्तामिति केनोर्द्ध्वदक्षिणे अग्निं स्थापयेत् ॥ यज्ञावि नायकादीन्यंचोत्तरतर
वस्थापयेत् ॥ उत्तरे दशाधिपतिं । वास्तोष्पतिं चावाहयेदित्यके ॥ नाहिस्य एामि
न्यस्य विश्वामित्र ऋषिः त्रिष्टुप्छंदः दशाधिपतिर्देवता ॥ ॐ नाहस्य शर्मावि
दन्ने न्यमस्मा है श्वान ना हुरः श तार म स्ने ॥ एमे नमह धे न्नुम्न ताः श्रम सर्यं वे श्वा
नरं सै आजित्याय देवाः ॥ ॐ भूर्भुवः स्वः दशाधिपते इहागच्छ इह तिष्ठेति स्थापये
त् ॥ वास्तोष्पत इत्यस्य वशिष्ठ ऋषिः त्रिष्टुप्छंदः वास्तोष्पतिर्देवता ॥ ॐ वास्तोष्पते
प्रति जानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः ॥ यत्त्वेमहे प्रति तन्नो जुषस्व श
नो भव द्विपदे शं चतुष्पदे ॥ ॐ भूर्भुवः स्व वास्तोष्पत इहागच्छ इह तिष्ठेति वास्तो
ष्पतिं स्था० ॥ ततः इन्द्रादिलोकपालान्सूर्याभिमुखान्स्थापयेत् ॥ शिवसमा वा
रा त ॥ नत्रमं भाः ॥ त्रातारमिन्द्रस्य गर्ग ऋषिः त्रिष्टुप्छंदः इन्द्रो देवता० ॥ ॐ त्रा

नारीमिंद्रं ॥ ॐ अर्भवस्वइंद्र इहागछे हतिविष्ट्या पूर्ववत ॥ एवं उत्तरत्र ॥ त्वं नो
अग्नइत्यस्याहिरण्यस्तूप ऋषिः त्रिष्टुप् छंदः अग्निर्देवता ॥ आग्निस्याप० त्वं नो अ
ग्ने तव देवपायुभिर्मघोनो रक्ष तन्वश्च वंद्य त्राता तोकस्य तनये गवामस्यनिमे
षं रक्षमाण स्तव व्रते ॥ सुगन्नुपंथामित्यस्य प्रजापति ऋषिः त्रिष्टुप् छंदः अग्नि
र्विवस्वान्यमो देवता यमस्या० ॥ सुगन्नुपंथां प्रदिशन्न एहि ज्योतिष्मध्येह्यजरन्न आ
युः ॥ अपैतु मृत्युरमृतं न आगन्वैवस्वतो नो अभयं कृणोतु स्वाहा ॥ अपैतु मृत्युमिति
त्यस्य विवस्वानृषिः त्रिष्टुप् छंदः निर्ऋतिर्देवता निर्ऋतिस्या० ॥ ॐ अपैतु मृत्युं तमय
जमानुमिधत्तो नस्येत्याममन्निविहितस्करस्य ॥ अन्यमस्मादिछसा तइत्या नमो देवि
निर्ऋते तेन तुभ्यमस्तु ॥ तत्त्वायामीति शुनःशेप ऋषिः त्रिष्टुप् छंदः वरुणो देवता १४
वरुणस्या० ॥ ॐ तत्त्वायामि ॥ आ नो नियुद्भिरित्यस्य वशिष्ठ ऋषिः त्रिष्टुप् छंदः

नि

वायुर्देवता वायु०॥ आ नो नियुद्भिः॥ वयं सोमेत्यस्य बंधु ऋषिः त्रिष्टुप् छंदः सो
मो देवता सोमस्या०॥ ॐ वयं सोम०॥ तमीशानमित्यस्य गौतम ऋषिः जगती छं
दः ईशानो देवता ईशानस्या०॥ ॐ तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे
हूमहे वयं॥ पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये॥ ततो रवेर्मू
र्ध्वे शेषं स्यापयेन्नाममंत्रेण॥ सोमस्याग्रे वासुकिं। भौमस्याग्रे तक्षकं। बुधोत्तरे
कर्कोटकं॥ बृहस्पतेरग्रे पद्मं॥ शुक्रोत्तरे पद्मं। शनिपश्चिमे शंखपालं। राहोपुरतः
...। कंबलं। केतोपुरतः कुलिकं॥ ततो बहिर्भूगृहे पूर्वतः। अश्विन्यादिसप्त
नक्षत्राणि। विष्कंभादि सप्तयोगाः॥ बव बालव कौलवकरणे। सप्तद्वीपानि। ऋग्वेदश्चा
दक्षिणे पुष्यादिसप्तनक्षत्राणि। धृत्यादिसप्तयोगाः। कौलवतैतिलेकरणे। सप्त
सागराः। यजुर्वेदश्च। पश्चिमे स्वात्यादिसप्तनक्षत्राणि। वज्रादिसप्तयोगाः। गर

महा

भा

५० वाणि जेकरणे। सप्तपाना लोनि। सामवेदश्च। ५ तरे अग्निजिदादिसप्तनक्षत्राणि॥
काश्यपादि ब्रह्मयोगाः॥ विष्णुकरणं। भूराद्याः सप्तलोकाः॥ अथर्ववेदश्च। वायव्ये ध्रु
15 वं। सप्तर्षीश्च। ततोयथावकाशं गंगादि सप्तसरितः। सप्तकुलाचलाः। अष्टौ वस
वः। द्वादशादित्याः। एकादशरुद्राः। एकोनपंचाशन्मरुतः। षोडशमातरः। षड्ऋतवः॥
द्वादशमासाः। द्वे अयने। पंचदशतिथयः। षष्टिसंवत्सराः। सुपर्णो नागाः॥ सर्पाः।
यक्षाः। गंधर्वाः। विद्याधराः। अप्सरसः। रक्षांसि। भूतानि॥ मनुष्याः इति एते सर्वा
प्याः॥ ॥६०॥ ॐ मनोजूतिः॥ एषवैप्रतिष्ठा इति प्रतिष्ठां विधाय पूजयेत्॥ तत्रा
दौ ग्रहध्यानं॥ मत्स्यपुराणे॥ पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः॥ सप्ताश्वरथ १५
संस्थश्च द्विभुजः स्यात्सदा रविः॥१॥ श्वेतः श्वेतांबरधरो दशाश्वः श्वेतभूषणः॥

गदापाणिर्द्विबाहुश्च कर्त्तव्यो वरदः शशी ॥ २ ॥ रक्तमाल्यांबरधरः शक्तिशूलगदाधरः ॥ चतुर्भुजो मेषगमो वरदः स्याद्धरासुतः ॥ ३ ॥ पीतमाल्यांबरधरः कर्णिकारसमद्युतिः ॥ खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः ॥ ४ ॥ देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ ॥ दंडिनौ वरदौ कार्यौ साक्षसूत्रकमंडलू ॥ ५ ॥ इंद्रनीलद्युतिः शूली वरदो गृध्रवाहनः ॥ बाणबाणासनधरः कर्तव्योर्कसुतः सदा ॥ ६ ॥ करालवदनं खड्गचर्मशूली वरप्रदः ॥ नीलसिंहासनस्थश्च राहुरत्र प्रशस्यते ॥ ७ ॥ धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः ॥ गृध्रासनगता नित्यं केतवस्तु वरप्रदाः ॥ ८ ॥ सर्वे किरीटिनः कार्या ग्रहा लोकहितावहाः ॥ अंगुलेनोच्छ्रिताः सर्वे शतमष्टोत्तरं शनैः ॥ ८ ॥ विष्णुधर्मोत्तरे ॥ पंचवक्त्रो महाबाहुः शतिवर्णस्त्रिलोचनः ॥ कपालं खड्गांगी चंद्रमौलिः सदाशिवः ॥ अक्षसूत्रं च कमलं दर्पणं च कमंडलुं ॥ उमाविभर्ति हस्तेषु

सू०

२० त्रिनात्रिदशैरपि ॥२॥ कुमारस्तु षण्मुखः कार्यः शिखंडकविभूषणः ॥ रक्तांबरधरः कार्यो मयूरवरवाहनः ॥३॥ कुक्कुटस्य तथा घंटा तस्य दक्षिणहस्तयोः ॥ पताकां वैजयंतीं स्याच्छक्तिः कार्या च वामयोः ॥ दक्षिणं दक्षिणाधः करादारभ्यानिरुपदाः ॥ विष्णुः कौमोदकी पद्मशंखचक्र गदाधरः क्रमात् ॥४॥ वलोप वी नीसिंहस्यैकवक्त्र चतुर्भुजः ॥ ब्रह्मसूत्रं त्रिभंगं कुंडिकं च प्रजापतिः ॥५॥ चतुर्दंतगजारूढो वज्री कुलिशसत्करः ॥ शचीपतिः प्रकर्तव्यो नानाभरणभूषितः ॥६॥ यमः कार्यो दंडहस्तो विज्ञानतः ॥ रक्तदृक्याश भृत्सौम्यो विभूषितः ॥७॥ कालः करालवदनो नित्यमप्यति भीषणः ॥ पाशहस्तो दंडहस्तः सर्पवृश्चिकरोमवान् ॥८॥ डरीबद्धैः स्वाकारं द्विभुजं सौम्यदर्शनं ॥ पुत्रकालोकनपरं चित्रगुप्तं विनिर्दिशेत् ॥९॥ दक्षिणे लेखनीं तस्य वामे पत्रं तु कारयेत् ॥ पिंगलश्मश्रुकेशांतः पिंगाक्षस्त्रि १६

तयोः स्मृतः ॥१०॥ छागस्थः स्माक्षिसूत्रं श्रुवसङ्गतार्धिः शक्तिधारकः ॥ विहितं च वरेण्यस्य क-
रमन्यं तु कारयेत् ॥११॥ आपः स्त्रीरूपधारिण्यः श्वेता मकरवाहनाः ॥ ध्यानात्पाशक-
लशौ मुक्ताभरणभूषिताः ॥१२॥ मृगकं वर्णो महीकार्यो दिव्याभरणभूषिता ॥ चतुर्भु-
जा सौम्यवपुः वंडो मुसहस्तां वरा ॥ रत्नपात्रं सस्यपात्रं पात्रमौषधिसंयुतं ॥ पद्मकं
रेयकर्तव्यं भूयो याद्वनंदना ॥ दिग्नागानां चतुर्णां स्या कार्याए छगता मया ॥ ३ ॥ विशि-
डलस्त्राणां प्रागुक्तं ॥५॥ वामेशव्याकरे कार्यो सौम्यासंतानमञ्जरी ॥ वरदामंडिता का-
र्यो द्विभुजा च तथा शची ॥८॥ प्रजापतिसलक्षणमपि प्रागुक्तं ॥ ७ ॥ अक्षसूत्रधरा नाः सर्पाः
कुण्डिकापुच्छसंयुताः ॥ एकभोगा द्विभोगा वा सर्पाः कार्याश्च भीषणाः ॥ ८ ॥ पद्मासन-
स्थो नरैर्लोकजलं कार्यश्चतुर्मुखः ॥ अक्षमालां स्रुवं विभ्रत् पुस्तकं च कमण्डलुं ॥ ९ ॥
वासः कृष्णाजिनं तस्य पार्श्वे हंसस्तथैव च ॥ १० ॥ विनायकादिगणेभ्यो लक्षणानि

विष्णुधर्मो नरेश्वर॥ चतुर्भुजस्त्रिनेत्रश्च कर्तव्यो गजलाननः॥ नागयज्ञोपवीतश्च
शशांककृतशेखरः॥ दंतं दक्षकरे दद्याद्द्वितीये चाक्षसूत्रकं॥ तृतीये परशुं दद्याच्च
तुर्थे मोदकं तथा॥१॥ शक्तिबाणं तथा शूलं खड्गं चक्रं च दक्षिणे॥ चंद्रबिंबं मयो वा
खेटं मूर्द्धकपालकं॥ सुरंक कं वविभ्राणा एसिं हा त्र ठा वादिग्भुजा॥ एवं देवी समुद्दिष्ठा
दुर्गा दुर्गार्त्तिहारिणी॥२॥ धावतं हरिणं एषस्थो ध्वजधारी समीरणः॥ वादानकरो
त्र वर्णैः कार्यो विज्ञानता॥३॥ नीलोत्पलाभं गगनं तद्दंती वरधारि वा॥ वज्रांकं हस्तं कर्त
व्यं द्विभुजं सौम्यरूवं वा॥४॥ द्विभुजो देवर्षिषु लोक कर्तव्यो देहहेतुतो॥ तयोरोषधयः
कार्या द्वियाद्दक्षिणहस्तयोः॥ वामयोः पुस्तको कार्यौ दर्शनीयौ तथाद्भुतो॥ एकस्य
दक्षिणे पार्श्वे वामे वान्यस्य यादव॥ नारीयुगं प्रकर्तव्यं सुरूपं चारुदर्शने॥ रत्नभांड
करे कार्यं चंद्रभल्लं वरे तथा॥ ततः षोडशोपचारैः पूजा॥ आकृष्णेनेति पठित्वा॥ॐ
सूर्याय नमः आवाहनं॥ ॐ सूर्याय नमः इदमासनं॥ सूर्याय नमः इदं पाद्यं॥ सूर्याय

लि ५

नमः १ षो र्घः सूर्याय नमः इदमाचमनीयं। सूर्याय नमः पयसा सूर्यं स्नपयामि। सूर्याय नमः दध्ना सूर्यं स्नपयामि। सूर्याय नमः आज्येन सूर्यं स्नपयामि। सूर्याय नमः मधुना सूर्यं स्नपयामि। सूर्याय नमः शर्करया सूर्यं स्नपयामि। सूर्याय नमः इदं स्नानं। सूर्याय नमः इदं पुनराचमनीयं। सूर्याय नमः इदं रक्तवस्त्रं। सूर्याय नमः इदं रक्तचंदनानुलेपनं॥ सूर्याय नमः इमानि पुष्पाणि इति पुष्पां नैवेद्यं॥ सू० एष धूपः। सू० एष दीपः॥

सू० इदं नैवेद्यं॥ सूर्या० इदं तांबूलं॥ सू० इति नमस्कारः। इति सूर्यं संपूज्य होमप्रकारेण वक्ष्माण स्वशाखीय मंत्रैः सोमाय नमः इत्यादि चतुर्थी नमोंतेन नाममंत्रेण ... यजेत्॥ ॥प्रयोगस्त्वेवं॥ ॐ सोमाय नमः। ॐ भौमाय नमः। ॐ बुधाय नमः। ॐ बृहस्पतये नमः॥ ॐ शुक्राय नमः॥ ॐ शनैश्चराय नमः॥ ॐ राहवे नमः॥ ॐ केतुभ्यो नमः॥ अनेन प्रकारेण सूर्यादिनवग्र

रक्त

ग्र॰ह॰ हपूजनं॥ अथाधिदेवतापूजनं॥ ॐ ईश्वरायनमः अयंगंधः॥ ईश्वरायनमः इदंपु॰॥
ईश्वरायनमः अयंधूपः॥ ईश्वरायनमः अयंदीपः॥ ईश्वरायनमः इदंनैवेद्यं॥ इतिईश्वर
पूजनं॥ एवं ॐ उमायैनमः॥ ॐ स्कंदायनमः॥ ॐ विष्णवेनमः॥ ॐ ब्रह्मणेनमः॥ ॐ इंद्रा
यनमः॥ ॐ यमायनमः॥ ॐ कालायनमः॥ ॐ चित्रगुप्तायनमः॥ अनेनप्रकारेण गंधा
द्युपचारैः अधिदेवतापूजनं॥ एवमेव ॐ अग्नयेनमः॥ ॐ अप्भ्योनमः॥ ॐ ध
रायैनमः॥ ॐ विष्णवेनमः॥ ॐ इंद्रायनमः॥ ॐ इंद्राण्यैनमः॥ ॐ प्रजापतयेनमः॥ ॐ
सर्पेभ्योनमः॥ ॐ ब्रह्मणेनमः॥ अनेनप्रयोगेणप्रत्यधिदेवतापूजनं॥ एवमेव ॐ
विनायकायनमः॥ ॐ दुर्गायैनमः॥ ॐ वायवेनमः॥ ॐ आकाशायनमः॥ ॐ अश्वि
कुमाराभ्यांनमः॥ अनेनप्रयोगेणपंचलोकपालपूजनं॥ एतावन्यशक्तौ आवा १८
हनादिदत्वादिदेवताभ्योनमः इतिमंत्रेण वा सर्वान्पूजयेत्॥ सूर्यादीनां ग्रहा

णांच स्ववर्णानि कुसुमानि । अनुलेपनानि सुगंधानि रोचेभ्यस्तु सितसुगंधिवत्या
नुलेपनानि दातव्यानि ॥ तथा चोक्तं ॥ श्रीखंडं भार्गवे यंद्रे भौमे के रक्तचंदनं ॥ बुधे जी
वे तु कौसुमं शेषाणां कुंकुमं स्मृतं ॥ हयारिकुसुमैः सूर्यं कुमुदैश्चंद्रमर्चयेत् ॥ सि
तिजं तु जपापुष्पैश्चंपकैः सोमनंदनं ॥ शतपत्रैर्गुरुः पूज्यो जातीपुष्पैस्तु भार्गवं ॥ मल्लि
कासुमैः पंगुं कुंदपुष्पैर्विधुंतुदं ॥ केतूनां विविधैः पुष्पैर्वर्तकालोद्भवैः शुभैः ॥ कु
माराऽपंरवे धूपं तंदुलाज्यं निशाकरे ॥ शशलांकिमहीपुत्रे बुधे जीवे गुग्गुलं स्मृतं ॥ सा
ज्यं विल्बागिरं शुक्रे शनेर्दद्या च्च गुग्गुलं ॥ राहोर्लाक्षान खं केतोर्मैत्रेण भरसीनि ॥
नववर्त्तियुतं दीपं घृतेनपरिपूरितं ॥ ग्रहाणामग्रतः कार्यं तोऽमोसि मंत्रक
ल्पितं ॥ अलाभे धूपमस्तु नामि गुग्गुलः सर्वेभ्यो दातव्यः ॥ वेद्युपरि विचित्रवर्णे
शोभनं पफलपुष्पयुतं वितानं कं देयं ॥ उद्वितानं कफलपुष्पशोभितं सूर्याद्देव

१९० ताभ्यो नमः इति दातव्यं ॥ ततो गृहवेदिसमीपे भूमौ पूर्ववल्लिखितमंत्रानुदीर्यपूजित
देवताभ्यो बलिदानं ॥ तद्यथा ॥ आकृष्णेनेति पठित्वा सूर्याय गुडौदनं बलिर्नमः ॥
एवं घृतपायसं सोमाय । मसूरान्नं कुजाय । क्षीरोदनं बुधाय । दध्योदनं बृहस्पतये ।
घृतौदनं शुक्राय । कृसरं शनैश्चराय । छागमांसं राहवे ॥ चित्रौदनं केतुभ्यः ॥ अ
न्येभ्यः पायसं । उक्तालाभे सर्वेभ्यो वा पायसं ॥ ततः सर्वेभ्यो भूरिभक्ष्याणि फेनिका
दीनि दद्यात् ॥ तद्यथा ॥ एतानि फेनिकादि भूरिभक्ष्याणि नवग्रहादिभ्यो नमः ॥
इति दद्यात् ॥ ततो गृहवेदीशानभागे गोमयोपलिप्ते धान्य त्वां त्वादित्यादिभिः र
क्तपीतसितासिते स्तण्डुलैश्चतुर्विंशतिदलान्वितं सकर्णिकं कमलं विलिख्य त
स्य कर्णिकायां व्रीहीन्निधाय तदुपरि च अ... एकं कलशं बहिर्दध्यक्षतादि भूषितं
चंदनमाला चर्चितं पूर्ववत्कलशं निदध्यात् ॥ ततः कलशे गंगाद्यावाहनं कुर्यात् ॥ १२
तस्मिन्कलशे तन्त्रायामीति वरुणमावाहयेत् । जयेश ॥ ततः आचार्यः त्र्यंबकेन

पश्चादुपविश्य शाण्णागम्पदेशकालौ स्मृत्वा अस्मिन्नवग्रहमखाख्ये कर्म्म
णि होमं करिष्ये॥ तत्रैकल्पिकस्मरणं॥ पूर्वेण ब्रह्मणोगमनं। उत्तरेण पात्रासा
दनं द्वे पत्रे ताम्रमयी आज्यस्थाली॥ ताम्रमयी चरुस्थाली। पलाशपः समिधः
प्रोक्षावाघारौ। समिद्धतमे आज्यभागौ। पूर्णपात्रं दक्षिणा॥ एतान्वैकल्पिक पदार्था
नहं करिष्ये॥ अथदेवताभिध्यानं॥ प्रजापतिं। इंद्रं। अग्निं। सोमं। एताः आज्येन। अ
थप्रधानदेवताः॥ आदित्यं। सोमं। भौमं। बुधं। बृहस्पतिं। शुक्रं। शनैश्चरं। राहुं केतुं॥ इ
तिग्रहान्नाम्नाऽर्कादिसमिद्भिः ईश्वरं। उमां। स्कंदं। विष्णुं। ब्रह्माणं। इंद्रं। यमं। कालं॥
चित्रगुप्तमित्यधिदेवताः॥ अग्निं। आपः। धरां। विष्णुं। इंद्रं। इंद्राणीं। प्रजापतिं। स
र्पान्॥ ब्रह्माणमितिप्रत्यधिदेवताः॥ विनायकं। दुर्गां। वायुं। आकाशं। अश्विना
विति लोकपालांश्च त्र्यम्बकसंख्याभिः पलाशसमिद्भिरेकैकयाज्याहुत्याऽरकैक

२० याचर्वाहुत्याआज्यदशांशेन तिलाद्युपकल्पितद्रव्येण होममहं करिष्ये। शेषेण
अग्निं स्विष्टकृतं॥ अग्निं वायुं। सूर्यं। अग्नीवरुणौ॥ अग्निं। वरुणं। सवितारं। विष्णुं
विश्वान्देवान्मरुतः स्वर्कान्। वरुणं प्रजापतिं। एता अंगदेवताप्रधानार्थदेवता
आज्येनास्मिन्कर्मण्यहं यक्ष्ये॥ अग्नेर्दक्षिणतो ब्रह्मासनेनास्तरणं। तत्र ब्रह्मोप
वेशनं। वारुणमुदयमसं अंतरिक्षस्यंडदके न पूरयित्वा भूमौ निधायालभ्य प्र
णीयोत्तरतोग्नेः स्थापनं। बर्हिर्भ्यां दक्षिणमग्नेः परिस्तरणं॥ अथैवत्पात्रासाद
नं। पवित्रच्छेदनानि त्रीणि। पवित्रे द्वे। प्रोक्षणीपात्रं। वारुणं। आज्यस्थाली। च
रुस्थाली। संमार्जनकुशाः। उपयमनकुशाः। सामिधस्तिस्रः। स्रुवः। आज्यं। व्रीहि २०
तंडुलाः। अर्कादिसमिधः। पूर्णपात्रं दक्षिणा। पवित्रच्छेदनैः पवित्रीकरणं। प्रो
क्षणीपात्रे प्रणीतोदकमासिच्य पवित्राभ्यामुत्पवनं। प्रोक्षणीनां सव्यहस्तकरणं॥

दक्षिणेनोद्धृंगनं। प्रणीतोदकेन प्रोक्षणीनां प्रोक्षणं। प्रोक्षण्युदकेन आज्यस्थाल्याः प्रो
क्षणं। संमार्जन कुशानां प्रोक्षणं। उपयमनकुशानां प्रोक्षणं। समिधां प्रोक्षणं।
[illegible] स्रुवस्य प्रोक्षणं। आज्यस्य प्रोक्षणं। तंडुलानां प्रोक्षणं। पूर्णपा
त्रस्य प्रोक्षणं। असंचरे प्रोक्षणीनां निधानं। आज्यस्थाल्यामाज्यनिर्वापः। चरुपात्रे
नो५ प्रणीदकासेकपूर्वकं तंडुलप्रक्षेपः। आज्याधिश्रयणं। चरोरधिश्रयणमाज्यस्यो
त्तरतः॥ पर्यग्निकरणमुभयोः। स्तेचरौ स्रुवस्य प्रतपनं। स्रुवपुष्करस्य संमार्ज
कुशैः संमार्जनं। उत्तानपुष्करस्य बुध्नादारभ्य कुशैरग्रपर्यंतं सम्मृज्य। अग्रादार
नो भ्याधस्तान्मूलैः। प्रणीदकेनाभ्युक्षणं। पुष्करादारभ्य पुनः प्रतपनं। दक्षिणेतोनि
धानं। आज्योद्वासनं। यत्नपूर्वेण नीयाग्नेरुत्तरतः स्थापयेत्॥ चरुसमुद्वासनं॥

न० अग्नेरुत्तरतश्चाज्यं प्रदक्षिणीकृत्वा ज्यस्योत्तरतश्चरुस्थापयेत्। आज्योत्पवनं अवे
क्षणं। अपद्रव्यनिरसनं। प्रोक्षणेत्पवनं। उपयमकुशादानं। निष्टसमिधादानं। प्रोक्ष
८ णंदकेन प्रदक्षिणं पर्युक्षणं। पवित्रयोः अग्नौ अनुनिधानं॥ अप्रदक्षिणं आन्वा अन्व
होतिस्थानं उपविष्टो ब्रह्मणा कुशैरन्वारब्धः। स्रुवेण जुहोति। अग्नेरुत्तरभागे। ॐ
प्रजापतये स्वाहा। इदं प्रजापतये न मम। अग्नेर्दक्षिणे भागे। ॐ इन्द्राय स्वाहा। इदमिं
द्राय न मम। समिद्धतमे। ॐ अग्नये स्वाहा। इदमग्नये। ॐ सोमाय स्वाहा। इदं सोमाय।
नतो यजमानेन द्रव्यत्यागः कार्यः। सर्ववहुकत्के यथाकालं प्रत्याहुति त्यागस्य
कर्तुमशक्यत्वात्सर्वमेव होमजातं मनसा ध्यात्वा देवताभ्य इदं यथादैवतमस्तु
न ममेत्येवं नृपः। अथवा आदित्यसोमभौमबुधबृहस्पतिशुक्रशनैश्चरराहुकेतवे
श्वरोमास्कंदविष्णुब्रह्मेन्द्रयमकालचित्रगुप्ताग्न्यापवसुविष्णुरुद्रेन्द्राणीप्रजापति २१
सर्पब्रह्मविनायकदुर्गावायुआकाशाश्विकुमारेभ्यः इदं संपादितं समिद्धं

तिलादिद्रव्यं मयात्यक्तं ।। इति द्रव्यत्यागः ।। अथाग्निं पंचोपचारादिभिः संपूज्य त
तः सूर्याद्युद्देशेन शादेशमात्राश्चव्येगा घृतलौ की टाध जग्धाः कनिष्ठिका स्थूलाः
अर्कादिसामधोमधुसर्पिरभ्यक्ताः ।। सूर्यादिमंत्रैः प्रतिग्रहमष्टोत्तरशतमष्टा
विंशति अष्टसंख्यावा क्रमेण होतव्याः ।। अथ नवग्रहहोमः ।। तत्र सूर्यस्य । आ
कृष्णेनेति हिरण्यस्तूप ऋषिः त्रिष्टुप् छंदः सविता देवता आदित्यप्रीतये कपिला
ग्नौ अर्कसमिद्धोमे विनियोगः ।। आकृष्णेन० पश्यन् । स्वाहा ।। अथ सोमस्य । इमं
देवेति वरुण ऋषिः । यजुः सोमो देवता सोमप्रीतये पिंगलाग्नौ पलाशसमिद्धोमे
विनियोगः ॐ इमं देवा० ।ऽ।सा स्वाहा ।। अथ कुजस्य । अग्निर्मूर्द्धेति विरूपाक्ष ऋ
षिः । गायत्री छंदः भौमो देवता भौमप्रीतये धूमकेत्वग्नौ खादिरसमिद्धोमे वि
नियोगः । ॐ अग्निर्मूर्द्धा० जिन्वति स्वाहा ।। अथ बुधस्य । उद्बुध्यस्वेति परमेष्ठी

अग०

ऋषिः त्रिष्टुप् छंदः बुधो देवता बुधप्रीतये जठराग्नौ अपामार्गसमिद्धोमे विनि
योगः ॥ ॐ उद्बुध्यस्वाग्ने० सीदत स्वाहा ॥ अथ बृहस्पतेः ॥ बृहस्पते अतीति
गृत्समद ऋषिः त्रिष्टुप् छंदः बृहस्पतिर्देवता बृहस्पतिप्रीतये जपे विनियो
गः ॥ शिखिनामाग्नावश्वत्थसमिद्धोमे विनियोगः ॥ ॐ बृहस्पते अति० येहि
विअं स्वाहा ॥ अथ शुक्रस्य ॥ अन्नात्परिस्रुत इत्यस्याश्विसरस्वतीन्द्रा ऋषयः अ
ति जगती छंदः शुक्रो देवता शुक्रप्रीतये हाटकाग्नावुदुंबरः समिद्धोमे विनि
योगः ॥ ॐ अन्नात्परिस्रुतो० मधु स्वाहा ॥ अथ शनैश्चरस्य ॥ शन्नोदेवीति दध्य
ङाथर्वण ऋषिः गायत्री छंदः शनैश्चरो देवता ॥ शनैश्चरप्रीतये महातेजाग्नौ
रा शमीसमिद्धोमे विनियोगः ॥ ॐ शन्नो देवीरभिष्टय० स्रवंतु नः स्वाहा ॥ अथ राहोः ॥ २२
कया न इति वामदेव ऋषिः ॥ गायत्री छंदः राहुर्देवता राहुप्रीतये हुताशननाम्ना
ग्नौ दूर्वासमिद्धोमे विनियोगः ॥ ॐ कया नश्चित्र० शिष्ठया वृता स्वाहा ॥ अथ केतूनां ॥ केतुं

ॐ एवम्निनि मधुच्छंदा ऋषिः गायत्री छंदः केतुर्देवता केतुप्रीतये विनियोगः॥
रोहिताग्नौ कुशसमिद्धोमे विनियोगः॥ ॐ केतुं कृण्वन्न० रसायपाः स्वाहा॥
अथाधिदेवतानां॥ तत्रेश्वरस्य। त्र्यंबकमितिवशिष्ठ ऋषिः अनुष्टुप् छंदः त्र्यंब
को देवता त्र्यंबकप्रीतये पलाशसमिद्धोमे विनियोगः॥ ॐ त्र्यंबकं यजामहे सुगं
धिं पुष्टिवर्द्धनं० मामृतात्स्वाहा॥ अथोमायाः श्रीश्चते नित्उत्तर नारायण ऋ
षिः त्रिष्टुप् छंदः उमादेवता उमाप्रीतये पलाशसमिद्धोमे विनियोगः॥ ॐ श्री
श्चतेलक्ष्मी० षाणस्वाहा॥ अथस्कंदस्य। यदक्रंद इति भार्गवो ऋषि नमदग्नि
दीर्घतमाश्च ऋषयः त्रिष्टुप् छंदः स्कंदो देवता स्कंदप्रीतये पलाशसमिद्धो
मे विनियोगः॥ ॐ यदक्रंदः प्र० अर्वन्स्वाहा॥ अथविष्णोः विष्णोररराटमित्यस्य

२२०
प्रजापतिर्ऋषिः यजुः विष्णुर्देवता विष्णुप्रीतये पलाशसमिद्धोमे विनियोगः ॥ ॐ वि
ष्णोरराट० विष्णवे त्वा स्वाहा ॥ अथ ब्रह्मणः । आ ब्रह्मन्निति प्रजापति ऋषिः यजुः ब्र
ह्मा देवता ब्रह्मप्रीतये पलाशसमिद्धोमे विनियोगः ॥ अथेंद्रस्य । सजोषा इंद्र
ति विश्वामित्र ऋषिः त्रिष्टुप् छंदः इंद्रो देवता इंद्रप्रीतये पलाशसमिद्धोमे वि
नियोगः । ॐ सजोषा इंद्र० विश्वतो नः स्वाहा ॥ अथ यमस्य । यमाय त्वेति
दध्यङ्ङाथर्वण ऋषिः यजुः यमो देवता यमप्रीतये पलाशसमिद्धोमे विनि
योगः । ॐ यमाय त्वां० पितृभ्यः स्वाहा ॥ अथ कालस्य । कार्षिरसीति दध्यङ्ङाथर्व
ण ऋषिः अनुष्टुप् छंदः कालो देवता कालप्रीतये पलाशसमिद्धोमे विनि
योगः । ॐ कार्षिरसि समुद्रस्य त्वाक्षित्या उन्नयामि समापो अद्भिरग्मत समो २२
षधीभिरोषधीः स्वाहा ॥ अथ चित्रगुप्तस्य । चित्रावसो इति ऋषयः ऋषयः

जगती छंदः विश्वगुरुर्देवता विश्वगुरुप्रीतये पलाशसमिद्धोमे विनियोगः॥
ॐ विश्वावसो० शीयस्वाहा॥ अथ अग्न्याधिदेवतानां॥ तत्रादौ अग्नेः अग्निं
दूतमित्यस्य विरूपाक्ष ऋषिः गायत्री छंदः अग्निर्देवता अग्निप्रीतये
पलाशसमिद्धोमे विनियोगः॥ ॐ अग्निं दूतं० दिह स्वाहा॥ अथ अपां॥
आपो हि ष्ठेति सिंधुद्वीप ऋषिः गायत्री छंदः॥ आपो देवता आपप्रीतये
पलाशसमिद्धोमे विनियोगः॥ ॐ आपो हि ष्ठा० चक्षसे स्वाहा॥ अथ पृ
थिव्याः॥ स्योना पृथिवीति मेधातिथि ऋषिः गायत्री छंदः पृथिवी देवता
पृथिवीप्रीतये पलाशसमिद्धोमे विनियोगः॥ ॐ स्योना पृथिवी० सप्रथाः
स्वाहा॥ अथ विष्णोः॥ इदं विष्णुरिति मेधातिथि ऋषिः गायत्री छंदः विष्णुर्देव
ता विष्णुप्रीतये पलाशसमिद्धोमे विनियोगः॥ इदं विष्णुर्वि० सुरे स्वाहा॥

ग्र० अथ पर्णस्य॥ त्रातारमिन्द्रस्य गर्ग ऋषिः त्रिष्टुप्छंदः इन्द्रो देवता इन्द्रप्रीतये पला
शसमिद्धोमे०॥ ॐ त्रातारमिन्द्र० वाविन्द्रः स्वाहा॥ अथ पराच्याः॥ अदित्यैरा
स्नेति इध्मवाहाथर्वण ऋषिः यजुः इन्द्राणी देवता इन्द्राणीप्रीतये पलाशस
मिद्धोमे विनियोगः॥ ॐ अदित्यैरास्ना० वीष्व स्वाहा॥ अथ प्रजापतेः॥
प्रजापतेति हिरण्यगर्भ प्रजापति ऋषिः॥ त्रिष्टुप्छंदः प्रजापतिर्दे व
ता प्रजापतिप्रीतये पलाशसमिद्धोमे विनियोगः॥ ॐ प्रजापते न० रयी
णां स्वाहा॥ अथ सर्पाणां॥ नमोस्तु सर्पेभ्य इति मंत्रस्य देवा ऋषयः
अनुष्टुप्छंदः सर्पा देवताः सर्पाणां प्रीतये पलाशसमिद्धोमे विनियो०
ॐ नमोस्तु सर्पेभ्य० सर्पेभ्यो नमः स्वाहा॥ अथ ब्रह्मणः॥ ब्रह्मजज्ञा २४
नमिति मंत्रस्य प्रजापतिर्ऋषिः त्रिष्टुप्छंदः ब्रह्मा देवता ब्रह्मप्रीत

येपलाशसमिद्धोमेविनियोगः॥ ॐ अग्नआनं० विवः स्वाहा॥ अ
थविनायकादिपंचकस्यानमगणपतेः॥ गणानां त्वेति मंत्रस्य ब्रह्मा
पति ऋषिः यजुः गणपतिर्देवता गणपतिप्रीतयेपलाशसमिद्धोमे
विनियोगः॥ गणानां त्वा० नमस्वाहा॥ अथदुर्गायाः॥ अंबे अंबि
कइति मंत्रस्यप्रजापति ऋषिः अनुष्टुप छंदः॥ दुर्गादेवता दुर्गाप्रीतये
पलाशसमिद्धोमेविनियोगः॥ अंबे अंबिके० सिनी स्वाहा॥ अथवायोः॥
आनोनियुद्भिरित्यस्य वशिष्ठ ऋषिः॥ त्रिष्टुपछंदः वायुर्देवता वायुप्रीत
येपलाशसमिद्धोमेविनियोगः॥ ॐ आनोनियुद्भि० सदानः स्वाहा॥ अथा
काशस्य॥ अथाकाशस्य॥ घृतं घृतपावानइति प्रजापति ऋषिः ऋवां
पंक्तिछंदः आकाशोदेवता आकाशप्रीतयेपलाशसमिद्धोमेविनियोगः॥

१२० घृतं घृतं०सि स्वाहा॥ अथाश्विनोः॥ यावांकाशेति मेधातिथि ऋषिः
गायत्री छंदः अश्विनौ देवता अश्विनोप्रीतये जपे विनियोगः॥ ॐ या
वां काशा०मिमिक्षतं स्वाहा॥ तत आकृष्णेनेत्यादिस्वेन स्वेन मंत्रेण देवतां मनसा ६३
ध्यायन् एकैकामाज्याहुतिं जुहुयात्॥ ततः साध्विजवरोः श्रुवेणावदा
य आकृष्णेनेत्यादिस्वेन स्वेन मंत्रेण एकैकामाहुतिं जुहुयात्॥ एतावदाया
र्यरेव कुर्यात्॥ ततो जपदशांशेन तिलयवब्रीह्यादियज्ञमानेनोपकल्पि
तद्रव्येण अग्निसप्तदेवतां मनसाध्यायन्द्रिरूपांशुश्राज्यु स्वेस्वेदश्रु
स्वे श्रुव होमः कार्यः॥ होमसंख्या च सम्यक् सावधानैः कार्या॥ ततः शुभे
मुहूर्ते होमसंख्यां संपूर्णां कृत्वा॥ एवं होमं परिसमाप्य वंदनाधुपचारै २५
रग्नेन येतिमंत्रेण संकल्पपूर्वकं स्वाहा स्वधायुतं अग्निं पूजयेत्॥ अग्न
येगंधादि विहिरवदध्यात् ॥ ततो वस्त्रादीन् देवताभ्यो यजमानसूत्रावरणदिशां के विहिताहुः॥

पूजासंपूर्णतां वाचयित्वा ॥ यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु ॥
न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतं ॥ आवाहनं न जानामि न जानामि विस
र्जनं ॥ पूजां चैव न जानामि क्षम्यतां परमेश्वराः ॥ इत्युक्त्वा ॥ ततश्च वसुरोधा
रवदाय अग्नौ स्विष्टकृते स्वाहा ॥ इदमग्नये स्विष्टकृते ॥ भूरित्यस्य प्रजापति
पे ८ ऋषिः गायत्री छंदः अग्निर्देवता प्रायश्चित्त होमे विनियोगः ॥ ॐ भूः स्वा
हा । इदमग्नये । भुव इत्यस्य प्रजापति ऋषिः उष्णिक् छंदः वायुर्देवता प्राय
श्चित्त होमे विनियोगः ॥ ॐ भुवः स्वाहा । इदं वायवे ॥ स्वरित्यस्य प्रजापति ऋ
षिः अनुष्टुप् छंदः सूर्यो देवता प्रायश्चित्त होमे विनियोगः ॥ ॐ स्वः स्वाहा ॥
इदं सूर्याय ॥ त्वं नो अग्न इति वामदेव ऋषिः त्रिष्टुप् छंदः अग्नीवरुणौ देवते

ग० प्रायश्चित्त होमे विनियोगः ॥ ॐ त्वं नो अग्ने० स्वाहा ॥ इदमग्नीवरुणाभ्यां ॥ स
त्वं नो अग्न इति वामदेव ऋषिः त्रिष्टुप् छंदः अग्नीवरुणौ देवते प्रायश्चित्त हो
मे विनियोगः ॥ ॐ स त्वं नो० एधि स्वाहा ॥ इदमग्नीवरुणाभ्यां ॥ अयाश्चाग्न इ
ति वामदेव ऋषिः बृहती छंदः अग्निर्देवता । प्रायश्चित्त होमे विनियोगः ॥ अया
श्चाग्ने० ॥ इदमग्नये ॥ ये ते शतमिति वामदेव ऋषिः त्रिष्टुप् छंदः वरुणः सविता
विष्णुर्विश्वेदेवा मरुतः स्वर्कादेवताः प्रायश्चित्त होमे विनियोगः ॥ ॐ ये ते शतं व
रुणं० ॥ इदं वरुणाय ॥ सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च ॥ उदुत्त
मामिति शुनःशेप ऋषिः त्रिष्टुप् छंदः वरुणो देवता प्रायश्चित्त होवि० ॐ उदुत्त
मं० ॥ स्याम स्वाहा ॥ इदं वरुणाय ॥ ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये ॥ एवं ना० वाहोति २६
होमं कृत्वा बलिं दद्यात् ॥ अथ [illegible] ॥ न ह्येवं ॥ अन्यायतन नस्य

सममे नाहंक्षुवादिक्षुयमा षभक्रूवलिंदिकया लेभ्योदधामर॥ आ नारामेंद्रामित्यस्य
गर्गऋषिः त्रिष्टुपछंदः इंद्रोदेवता इंद्रप्रीत्यर्थे वलिदाने विनियोगः॥ ॐ आ नारामेंद्र॥
इंद्रायसांगायसपरिवारायसायुधायसशक्तिकायएषमाषभक्रूवलिर्नमः॥ ओ
इंद्रादिशोरक्षवलिंभक्षममयजमानस्यवासकुटंवस्यायुःकर्त्ता क्षेमकर्त्ता शांतिकर्त्ता
पुष्टिदस्तुष्टिदो भववलितिनि पुष्पाक्षत जलाग्निपूर्वाभिमुखस्त्यजेत्॥ त्वंनो अग्नइ
त्यस्यहिरण्यस्तूपऋषिः त्रिष्टुपछंदः अग्निर्देवता आग्निप्रीत्यर्थे वलिदाने विनि
योगः॥ ॐ त्वंनो अग्ने॥ अग्नयेत्यादि भो अग्न रक्षाग्नेये॥ सुगंनुपंथामित्यस्य
प्रजापतिऋषिः त्रिष्टुपछंदः यमो देवता। यमप्रीत्यर्थे वलिदाने० ॐ सुगंनुपंथां
प्रदिशान्नएहिज्योतिष्मध्येह्यजरंन आयुः। अपैतु मृत्युरमृतंन आगाद्वैवस्व
तोनो अभयं कृणोतु स्वाहा॥ यमायसांगायेत्यादि। भोयमइत्यादि॥ ततो नैऋत्ये
अमुन्वंतमित्यस्यविवस्वानृषिः त्रिष्टुपछंदः निर्ऋतिर्देवता निर्ऋतिप्रीत्यर्थे व

ग्र०

लिदाने० ॐ अस्तु श्रौषट् तं० निऋतये स्वाहा इत्यादि ओं निऋतये इत्यादि ॥ ततः पश्चिमे

न त्वायामीति शुनःशेप ऋषिः त्रिष्टुप् छंदः वरुणो देवता वरुणप्रीत्यर्थे बलिदाने०

ॐ तत्त्वायामि ॥ वरुणाये इत्यादि ओं वरुणाय इत्यादि ॥ ततो वायव्ये ॥ आ नो नियुद्भिरस्य

स्य वशिष्ठ ऋषिः त्रिष्टुप् छंदः वायुर्देवता वायुप्रीत्यर्थे बलिदाने विनि० ॥ आ नो

नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुपयाहि यज्ञं ॥ वायो अस्मिन् सवने मा

दयस्व यूयं पात स्वस्तिभिः सदा नः ॥ वायवे स्वाहा इत्यादि ॥ ओं वायो इत्यादि ॥ उत्तरे

वयं सोमेत्यस्य बंधु ऋषिः गायत्री छंदः । सोमो देवता सोमप्रीत्यर्थे बलि० ॐ

वयं सोम० ॥ सोमाय इत्यादि । ओं सोमेत्यादि ॥ तत ईशान्ये । तमीशानेमित्यस्य

गौतम ऋषिः । जगती छंदः ईशानो देवता ईशानप्रीत्यर्थे बलिदा० ॐ तमीशानं

ईशानाये इत्यादि ॥ ओं ईशाने इत्यादि ॥ ईशानपूर्वयोर्मध्ये । अस्मे रुद्रा इत्यस्य प्रगाथ

ऋषिः त्रिष्टुप् छंदः ब्रह्मा देवता । ब्रह्मप्रीत्यर्थे बलिदाने० ॥ ॐ अस्मे रुद्रा मेहना पर्व

नासो हस्ते भरहूतो सजोषाः। पः२८ सते स्तु वचाय्यिवज्वऽइंद्र्येष्ठाः स्मा२०ऽ अवं
तु देवाः॥ अग्नेऽऐत्यादि। भो अग्नेऽऐत्यादि॥ भो अग्निन्नित्यादि। ततः पश्चिमनैऋत्यकोण
मध्ये स्योना पृथिवी त्यस्य मेधातिथि ऋषिः गायत्री छंदः अनंतो देवता अनंत
प्रीत्यर्थे बलि० ॐ स्योना पृथिवी। अनंताये त्यादि। भो अनंत इत्यादि॥ ततो गृहवे न ४
द्यां समंतात् गृहबलयो देयाः। तत्र पूर्वे आकृष्णेनेति हिरण्यस्तूप ऋषिः त्रिष्टुप छंदः
सविता देवता सूर्यप्रीत्यर्थे बलिदा०॥ ॐ आकृष्णेन रजसा॥ आदित्याय सांगाय
सपरिवाराय ईश्वराग्निरूपाधिदेवताप्र. त्यधिदेवतासहिताये मं माष भक्त व
लिं समर्पयामीति। पुष्पाक्षत जलं क्षिपेत्॥ रवेइमं बलिं गृहाण मम यात्रमान
स्य वा शांतिककर्त्तो भवेत्येवमादि॥ एवमुत्तर त्रापि॥ ततो वेद्यां गये आप्यायस्वे
ति गौतम ऋषिः। गायत्री छंदः सोमो देवता सोमप्रीत्यर्थे बलि०॥ आप्यायस्व॥
सोमायउमा अंबुपाधिदेवताप्रत्यधिदेवतायेत्यादि॥ ततो दक्षिणे। अग्निमूर्द्धे

ग्रा० तिविरूपाक्ष ऋषिः गायत्री छंदः अग्निर्देवता अग्निप्रीत्यर्थे वलिदा० ॐ अग्निमू
र्धा॥ भौमाय स्कंद भूमिरूपाधिदेवता प्रत्यधिदेवता सहिताय॥ ततः ईशान्यां॥ उ
द्बुध्यस्वेति परमेष्ठी ऋषिः त्रिष्टुप छंदः बुधो देवता बुधप्रीत्यर्थं वलि०॥ ॐ उद्बुध्यस्वा
ग्ने०। बुधाय नारायणाय विष्णुरूपाधिदेवता प्रत्यधिदेवता०॥ ततः उत्तरे बृहस्पते गृ
त्समद ऋषिः बृहस्पतिर्देवता बृहस्पतिप्रीत्यर्थं०॥ ॐ बृहस्पते अति०। बृहस्पतये ब्र
ह्मेंद्ररूपाधि०॥ ततः पूर्वे अन्नात्परिस्नुत इत्यश्विसरस्वतीन्द्रा ऋषयः अतिज
गती छंदः शुक्रो देवता शुक्रप्रीत्यर्थं वा०। अन्नात्परिस्नुतो॥ शुक्राय इंद्राणीरू
पाधिदेवता०॥ शन्नोदेवीति दध्याङ्गाथर्वण ऋषिः गायत्री छंदः शनैश्चरो देव
ता शनैश्चरप्रीत्यर्थं व० ॐ शन्नोदेवी॥ शनये यमप्रजापतिरूपाधिदेवता प्रत्यधिदे २८
वताय० ततो नैरृत्यां। कयान इति वामदेव ऋषिः गायत्री छंदः राहुर्देवता राहुप्री
त्यर्थं व०। ॐ कयानः। राहवे कालसर्परूपाधि०॥ ततो वायव्ये केतुं कृण्वन्निति

मधुछंदऋषिः गायत्री छंदः केतुर्देवता केतुप्रीत्यर्थे जपे विनियोगः ॥ केतुं कृण्वन्न ॥ केनवेचित्रगुप्त
ब्रह्मरूपाधिदेवताप्रत्यधिदेवता० ॥ अथ वेधुस्तोत्रं गणपत्यादिपंचकस्य ॥ गणानां त्वे
ति प्रजापति ऋषिः । अनुष्टुप्छंदः गणपतिर्देवता गणपतिप्रीत० ॥ ॐ गणानां त्वा ॥
गणपतये सोगाय ऋद्धिबुद्धिसहिताय मं वलिं इत्यादि ॥ अंबे अंबिके ति प्रजापति ऋ
षिः अनुष्टुप्छंदः दुर्गा देवता दुर्गाप्रीत० ॐ अंबे अंबिके ॥ दुर्गायै इत्यादि ॥ आ नो नियुद्भि
रित्यस्य वशिष्ठ ऋषिः त्रिष्टुप्छंदः वायुर्देवता । वायुप्रीत्यर्थे० ॥ ॐ आ नो नियुद्भिः
वायवे इत्यादि ॥ घृतं घृतपावान इति प्रजापति ऋषिः ऋ वांपंक्तिछंदः आकाशो दे
वता आकाशप्रीत्यर्थे० ॐ घृतं घृतपावानः । आकाशाय इत्यादि ॥ यावां कशेति मेधा शा
तिथि ऋषिः गायत्री छंदः अश्विनौ देवता अश्विनौप्रीत्यर्थे० ॐ यावां कशा० ॥ अ
श्विभ्यामित्यादि ॥ ततो वास्तोष्पते वलिः । वास्तोष्पत इति वशिष्ठ ऋषिः त्रिष्टुप्छं
दः वास्तोष्पतिर्देवता । वास्तोष्पतिप्री० ॐ वास्तोष्पते प्रति जानीह्यस्मान्त्स्वावेशो अन

श्री रुद्र स्वाहा

॥२० मीबो भका नः य त्वेमहे प्रतितन्नो जुषस्वशन्नो भेवोदिपदे शंचतुष्पदे स्वाहा॥ वास्तो

पत इत्यादि नमो महाबलिं कुंकुमादि रक्तपुष्पादियुतं सदीपं सदक्षिणं क्षेत्रपाला

३३० य धात॥ नहि स्पशमित्यस्य विश्वामित्र ऋषिः त्रिष्टुप् छंदः क्षेत्रपालो देवता क्षेत्र

पालप्रीत्यर्थे० नहि स्पशमविदन्नन्यस्मा द्वैश्वानरात् पुर एतारमग्नेः॥ अमेन

महावधन्नमृतास्ऽ अम र्त्यं वैश्वानरं क्षेत्रजित्या देवाः॥ क्षेत्रपालाय भूतप्रेतपिशा

चराक्षसशाकिनीडाकिनी वेतालादि परिवारयुताय इमं बलिं समर्पयामि॥ भो भो

क्षेत्रपाल इमं बलिं गृहाण मम यजमानस्य वा आयुः कर्ता क्षेम कर्ता शांति क

र्ता शुभकर्ता पुष्टिद स्तुष्टिदो भव॥ इमं बलिं दुर्गा सहितेन वा चतुष्पथे क्षिपेत्॥२ अथ

ततः प्रक्षालितपादश्चा वमय देशकालौ संकीर्त्य कृतस्य नवग्रह होमस्य संपूर्णता

सिध्यर्थं पूर्णाहुतिं होमं महं करिष्ये॥ इति संकल्प्य॥ शुचि च्य ह गृहीतं द्वादशाग्रहीतं